# राज राजेश्वरि राजकिरीटे

*राग : सिंहेंद्रमध्यमं*

*ताळ : आदि*

**पल्लवि :**

**राज राजेश्वरि राजकिरीटे**
**रजत महीधर सुविहारे**

**चरण :**

**चिन्मय हुतभुक् कुंडोद्भूते**
**चिरतर सुचरित सुतपोलभ्ये**
**दैवत पालिनि राक्षसहंत्रि**
**राजराजेश्वरि रम्यालोके ...१**

**निस्स्वार्थांतर्हृदय निवासे**
**नित्यारूपिणि निगमेशि**
**सर्वस्वार्पण संतुष्टे**
**संपद्दायिनि श्रीलक्ष्मि . ..२**

**देवि नवावरणांतर्दीपे**
**चिंतामणिमय गृहराज्ञि**
**विमल सुधांबुधि विरचित खेले**
**कमल वनीरत कलहंसि ...३**

भूपुर वासिनि भुवनेशि
षोडश पत्रे सुंदरी
अष्टदळे त्वं मन्मथरूपा
चतुर्दशारे भाग्यकरी ...४

बहिर्दशारे सिद्धिदा
अंतर्दशारे रक्षिणी
अष्टकोणे रोगघ्नी
त्वं त्रिकोणे त्रिपुरांबा ...५

राजराजेश्वरि बिंदुगता
सच्चिदानंदा सर्वगता
राजराजेश्वरि बिंदुगता
सच्चिदानंदा सर्वगता ...६